Sl. No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 28

No. of Printed Pages — 11

# S—71—Sanskritam (T.L.)

## माध्यमिक परीक्षा, 2021

## SECONDARY EXAMINATION, 2021

## तृतीय भाषा - संस्कृतम्

समय : $3\frac{1}{4}$ ( सपादहोरात्रयम् )

अधिकतमांका : 80

**परीक्षार्थिभ्यः सामान्य-निर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रश्नानां अंकभारः निम्नानुसारं वर्तते ।

| खण्ड | प्रश्नों की संख्या | अंक प्रत्येक प्रश्न | कुल अंक भार |
|---|---|---|---|
| खण्ड - अ (A) | 1 ( i से x ), 2 से 11 = 20 | 1 | 20 |
| खण्ड - ब (B) | 12 से 19 = 8 | 2 | 16 |
| खण्ड - स (C) | 20 से 23 = 4 | 4 | 16 |
| खण्ड - द (D) | 24 से 25 = 2 | 5 | 10 |
| खण्ड - य (E) | 26 से 28 = 3 | 6 | 18 |

(6) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

## खण्ड - अ

1. अधोलिखितप्रश्नानाम् उत्तरस्य कोष्ठके लिखितम् उचितं क्रमाक्षरं स्व-उत्तरपुस्तिकायां लिखत – 10 × 1 = 10

(i) देवनिर्मितं देशं प्रचक्षते –

(क) हिन्दुस्थानम् (ख) पाकिस्तानम्

(ग) राजस्थानम् (घ) कजाकिस्तानम् ।

(ii) सर्वदमनस्य माता आसीत् –

(क) तापसी (ख) सुव्रता

(ग) शकुन्तला (घ) गौतमी

(iii) महाराणाप्रतापस्य राज्याभिषेकः अभवत् –

(क) चित्तौडनगरे (ख) गोगुन्दाग्रामे

(ग) उदयपुरनगरे (घ) सलुम्बरग्रामे ।

(iv) केशवानन्दस्य गुरुः आसीत् –

(क) श्री लालबहादुरः शास्त्री (ख) सरछोटुरामः

(ग) गुरुः विश्वामित्रः (घ) गुरुः कुशलदासः ।

(v) साधोः विद्या भवति –

(क) विवादाय (ख) ज्ञानाय

(ग) दानाय (घ) मदाय ।

(vi) अजरामरवत् प्राज्ञः किं चिन्तयेत् ?

(क) विद्यां ज्ञानं च (ख) धनमर्थं च

(ग) विद्यामर्थं च (घ) विद्यां सुखं च ।

(vii) आत्महननं किं वर्तते ?

(क) महत्पापम् (ख) महादानम्

(ग) महद्दुःखम् (घ) महत्कष्टम् ।

(viii) शरीरविज्ञानविचक्षणः कः अस्ति ?

(क) आचार्येश्वरः (ख) ज्ञानेश्वरः

(ग) चरकेश्वरः (घ) रामेश्वरः ।

(ix) मीरबख्शी सलावतखानः केन सह सन्धिं करोति ?

(क) महाराणाप्रतापेन सह (ख) सूरजमल्लेन सह

(ग) शिवाजिमहाराजेन सह (घ) अकबरेन सह ।

(x) कस्मात् मा प्रमदः ?

(क) आत्मश्लाघायाः (ख) धनार्जनात्

(ग) गृहकार्यात् (घ) स्वाध्यायात् ।

**निर्देश :** प्रश्न संख्या **2 – 3** पर्यन्तं घटिकाचित्रसहायतया संस्कृतपदैः समयं पूरयित्वा वाक्यम् उत्तरपुस्तिकायां लिखत –




2. अशोकः ( 10 : 30 ) .............. वादने प्रार्थनां करोति । 1




3. राघवः ( 2 : 15 ) .............. वादने क्षेत्रं गच्छति । 1

**निर्देश :** प्रश्न संख्या **4 – 6** पर्यन्तं रेखाङ्कितपदं शुद्धं कृत्वा वाक्यं लिखत –

4. राजेशः भिक्षुकाय वस्त्राणि <u>यच्छन्ति</u> । 1

5. हिमालयस्य गङ्गा निर्गच्छति । 1

6. हरिणा वैकुण्ठम् अधिशेते । 1

**निर्देश :** प्रश्न संख्या **7 – 9** पर्यन्तं अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखत :

7. सरला गीतं गायति । 1

8. मया पत्रं पठ्यते । 1

9. सीता हसति । 1

**निर्देश :** प्रश्न संख्या **10 – 11** पर्यन्तं कोष्ठके प्रदत्त अव्ययपदेभ्यः उचितं पदं चित्वा वाक्यं पूरयित्वा लिखत :

10. प्रतापः .................. स्वदेशं परित्यज्य अन्यत्र प्रस्थितः अस्ति । 1

**( इति / इव / अपि )**

11. मेवाडमन्त्री भामाशाहः ................ कश्चन आगच्छन् प्रतीयते । 1

**( इव / एव / तत्र )**

## खण्ड - ब

12. कोष्ठके प्रदत्त अव्ययपदेभ्यः उचितं पदं चित्वा वाक्यं पूरयित्वा लिखत :

(i) सूरजमल्लं 'जाट-प्लेटो' .................. विरुदेन भूषितवान् । 1

**( नूनम् / इति / इदानीम् )**

(ii) .................. कालिदासः श्रेष्ठः अस्ति । 1

**( कविषु / कविभिः / कवीन् )**

13. अधोलिखितपदयोः सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखत –

(i) यशोदा $\frac{1}{2}+\frac{1}{2}=1$

(ii) विष्णुस्त्राता $\frac{1}{2}+\frac{1}{2}=1$

14. अधोलिखितपदयोः सन्धिं कृत्वा सन्धेः नामापि लिखत –

(i) पुनः + अत्र $\frac{1}{2}+\frac{1}{2}=1$

(ii) बालाः + हसन्ति $\frac{1}{2}+\frac{1}{2}=1$

15. अधोलिखितसमस्तपदयोः विग्रहं कृत्वा समासस्य नामापि लिखत –

(i) निर्मक्षिकम् $\frac{1}{2}+\frac{1}{2}=1$

(ii) यथाशक्ति $\frac{1}{2}+\frac{1}{2}=1$

16. अधोलिखितविग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत –

(i) दिनं दिनं प्रति $\frac{1}{2}+\frac{1}{2}=1$

(ii) हरौ इति $\frac{1}{2}+\frac{1}{2}=1$

17. अधोलिखितेषु रेखाङ्कितपदेषु विभक्तिं तत् कारणं च लिखत –

(i) सः जटाभिः तापसः प्रतीयते । 1

(ii) गणेशाय नमः । 1

18. कोष्ठके प्रदत्तप्रकृतिप्रत्ययाभ्यां पदं निर्माय वाक्यं पूरयत –

(i) श्यामः गीतं ............... गृहं गच्छति । ( गै + शतृ ) 1

(ii) देवदत्तः .............. आसीत् । ( ज्ञान + मतुप् ) 1

19. अधोलिखितवाक्ययोः रेखाङ्कितपदयोः प्रकृतिं प्रत्ययं च लिखत –

(i) पितरं सेवमानः सः यशः लभते । 1

(ii) सः ऋषिः क्रोधी अस्ति । 1

## खण्ड - स

20. अधोलिखितेषु प्रश्नेषु **चतुर्णां** प्रश्नानाम् उत्तराणि संस्कृत माध्यमेन लिखत – 4 × 1 = 4

(i) शास्त्रचर्चा कुत्र प्रवर्तते ?

(ii) वर्णचित्रितो मृत्तिकामयूरः कस्य आसीत् ?

(iii) मुगलैः सह प्रतापस्य मुख्यं युद्धं कुत्र अभवत् ?

(iv) स्वामिकेशवानन्दस्य बाल्यावस्थायां किं नाम आसीत् ?

(v) पृथिव्यां कति रत्नानि सन्ति ?

(vi) कीदृशं मित्रं वर्जयेत् ?

(vii) मरुदेशे के प्रसन्नाः भवन्ति ?

(viii) 'आचार्योपदेशः' इति पाठः कस्मात् ग्रन्थात् उद्धृतः अस्ति ?

21. अधोलिखितगद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं कुरुत – 4

"तदनन्तरम् एकलोऽपि सन् असार-संसार-दुःखदावानलद्वितीयः क्षुत्पिपासार्दितः बीरमा उत्तरस्यां दिशि अज्ञाते पथि आहिण्डमानः पञ्जाबे फिरोजपुरं प्राप्तः । तत्र केनापि कृपालुना आर्यसमाजस्य अनाथालये प्रवेशितोऽयं बीरमा रोटिकायाः अक्षरज्ञानस्य च युगपत् दर्शनम् इदम्प्रथमतया अकरोत् । अयमेव एकस्य पशुचारकस्य महापुरुषत्वं प्रति यात्रायाः प्रस्थानबिन्दुरासीत् ।"

**अथवा**

"मातृदेवो भव ! पितृदेवो भव! आचार्यदेवो भव ! अतिथिदेवो भव ! यानि अनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि । यानि अस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि । श्रद्धया देयम् । अश्रद्धया देयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् ।"

22. अधोलिखितस्य नाट्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं कुरुत – 4

बालः – जृम्भस्व सिंह ! दन्तांस्ते गणयिष्ये ।

प्रथमा – अविनीत, किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि ?

हन्त, बर्धते ते संरम्भः । स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि ।

द्वितीया – एषा खलु केसरिणी त्वां लङ्घयिष्यति यदि तस्याः पुत्रकं न मुञ्चसि ।

बालः – ( सस्मितम् ) अहो, बलीयः खलु भीतोऽस्मि ! ( इत्यधरं दर्शयति )

**अथवा**

प्रतापः – ( साश्चर्यम् ) किम् इदं भवान् करोति ? भवदीया सम्पत्तिः कथं मदीया ? किम् एतेन न मे अपमानः ? न अहं दत्तां सम्पत्तिं पुनराददाभि ।

भामाशाहः – ( सविनयम् ) महाराज ! न अहम् अपमानं करोमि । का तुच्छसेवके शक्तिः यया असौ तथा दुःसाहसं कुर्यात् । गृह्यतां महाराज ! गृह्यताम् ! देशधर्मयोः रक्षा विधीयताम् ।

23. अधोलिखितपद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं कुरुत – 4

"अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते ।

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।।"

**अथवा**

वर्षागमे चारुमरुं विहाय,

क्वान्यत्र कस्यापि रमेत चित्तम् ।

सरःसु वर्षासमयेपि यस्मिन्,

शरत्-प्रसन्नं सलिलं चकास्ति ।।

## खण्ड - द

24. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –

"समाजे नियमानां पालनम् अनुशासनं भवति । जीवने अनुशासनस्य विशेषं महत्त्वं भवति । प्रत्येकस्मिन् पदे अनुशासनम् आवश्यकं भवति । अनुशासनं विना किमपि कार्यं सफलं न भवति । छात्रेभ्यः अनुशासनं व्यवस्थायै परमावश्यकम् अस्ति । अनुशासितः सर्वेभ्यः प्रियः भवति । यस्मिन् समाजे अनुशासनं न भवति तत्र सदैव कलहः भवति । प्रकृतिः अपि ईश्वरस्य अनुशासने तिष्ठति । अतः अनुशासनस्य पालनं जीवने अत्यावश्यकं भवति ।"

(i) अस्य अनुच्छेदस्य समीचीनं शीर्षकं लिखत । 1

(ii) अनुशासनस्य विशेषं महत्त्वं कुत्र भवति ? 1

(iii) कः सर्वेभ्यः प्रियः भवति ? 1

(iv) प्रकृतिः कस्य अनुशासने तिष्ठति ? 1

(v) 'प्रत्येकस्मिन् पदे अनुशासनम् आवश्यकं भवति ।'

अस्मिन् वाक्ये क्रियापदं किम् अस्ति ? 1

**अथवा**

संस्कारैः संस्करणमेव संस्कृतिः । संस्कृतिः जीवनस्यान्तरङ्गं स्वरूपं प्रकाशयति । संस्कृतिः मानवजीवनस्य सुसंस्कृतं स्वरूपं वर्तते । संस्कृतिः सभ्यतायाः जननी भवति । संस्कृतिरेव कस्यापि राष्ट्रस्य गौरवं प्रमाणयति । भरतखण्डे भरतानां या आद्या संस्कृतिः आसीत् सैव भारतीया संस्कृतिः अस्ति ।

(i) उपर्युक्त गद्यांशस्य समुचितं शीर्षकं लिखत । 1

(ii) का सभ्यतायाः जननी भवति ? 1

(iii) संस्कृतिः कस्य गौरवं प्रमाणयति ? 1

(iv) सैव भारतीया संस्कृतिः अस्ति । इत्यत्र वाक्ये कर्तृपदं किम् अस्ति ? 1

(v) आद्या संस्कृतिः आसीत् । अत्र वाक्ये क्रियापदं किम् ? 1

25. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –

"उत्सवप्रियो हि लोकः । लोके बहुविधाः भवन्ति मेलापकाः । तेषु विविधाः आपणाः भवन्ति । मेलापके सर्वे आनन्दं स्वीकुर्वन्ति । बालकाः विविधैः क्रीडनकैः क्रीडन्ति । पुरुषाः सुमधुरं मिष्टान्नं खादन्ति । महिलाः वस्त्रापणेषु चित्रवस्त्राणि क्रीणन्ति । केचन कबड्डीस्पर्धां पश्यन्ति । ग्राम्याः कृषकादयः पशून् क्रीणन्ति विक्रयणं च कुर्वन्ति ।"

(i) लोकः कीदृशः अस्ति ? 1

(ii) 'लोके बहुविधाः भवन्ति मेलापकाः ।' अत्र 'बहुविधाः' इति विशेषणपदस्य विशेष्यपदं किम् ? 1

(iii) 'मेलापके सर्वे आनन्दं स्वीकुर्वन्ति ।' अत्र 'स्वीकुर्वन्ति' इति क्रियायाः कर्तृपदं किम् ? 1

(iv) 'बालकाः विविधैः क्रीडनकैः क्रीडन्ति ।' अत्र क्रियापदस्य चयनं कृत्वा लिखत । 1

(v) पुरुषाः सुमधुरं मिष्टान्नं खादन्ति । अस्मिन् वाक्ये विशेषणपदं किम् ? 1

**अथवा**

गृहस्य सुशिक्षिता स्त्री सद्गृहिणी गृहलक्ष्मीः गृहस्वामिनी वा भवति, सैव मातृभूता सद्वंशं सन्नागरिकं च निर्मातुं प्रभवति । स्त्री स्व समाजे धार्मिकसंस्काराणां सद्गुणादिकानां स्थापनां करोति । अतः समाजे राष्ट्रे वा स्त्रीणां समादरो मातृशक्तेश्च गौरवरक्षणं तदैव सम्भवति यदा ताः सुशिक्षिताः स्युः । स्त्रियो हि मातृशक्तेः प्रतीकभूताः भवन्ति ।

(i) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत । 1

(ii) का समाजे धार्मिकसंस्काराणां स्थापनां करोति ? 1

(iii) स्त्रियः कीदृशाः स्युः ? 1

(iv) गृहस्य सुशिक्षिता स्त्री नागरिकं निर्मातुं प्रभवति । अत्र विशेषणपदं किम् अस्ति ? 1

(v) स्त्रियो हि मातृशक्तेः प्रतीकभूताः भवन्ति । इत्यत्र वाक्ये क्रियापदं किम् ? 1

**खण्ड - य**

26. भवान् राजकीय-उच्च-माध्यमिक-विद्यालय-चन्द्रपुरस्य दशमकक्षायाः छात्रः दिनेशः । भवतः पितुः स्थानान्तरणम् अन्यत्र अभवत् । भवान् अपि सपरिवारं तेन सह गन्तुमिच्छति । स्वस्य प्रधानाचार्याय स्थानान्तरणप्रमाणपत्रं प्राप्त्यर्थम् एकं प्रार्थनापत्रं लिखतु । 6

**अथवा**

भवान् भावेशः । स्वकीयं ज्येष्ठभ्रातरं प्रति स्वकीयाध्ययनस्य विषये अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा लिखत ।

| |
|---|
| परीक्षायाम्, परीक्षायाः, तत्राऽस्तु, प्रणामाः, वार्षिकी, कालांशेषु । |

व्योमपुरतः

दिनांक: 08. 05. 2021

श्रद्धेयभ्रातृचरणयोः,

सादरं प्रणामाः ।

अत्र कुशलं .............. (i) ........... । भवदीयं स्नेहापूरितं पत्रम् अद्यैव प्राप्तवान् । कोरोनाकारणेन मम .............. (ii) ........... परीक्षा जूनमासे भविष्यति । इदानीं .............. (iii) ........... सिद्धतां सम्यक् कुर्वन् अस्मि । विद्यालयेऽपि अनवरतरूपेण .............. (iv) ........... अध्ययनं प्रचलति । आशासे यत् .............. (v) ........... उत्तमान् अङ्कान् प्राप्य कक्षायां श्रेष्ठस्थानं प्राप्स्यामि । परीक्षानन्तरं शीघ्रमेव गृहम् आगमिष्यामि । पूजनीयेषु मातृपितृचरणेषु मम .............. (vi) ........... निवेदनीयाः ।

भवदाज्ञाकारी अनुजः

भावेशः

27. मञ्जूषायाः उचितपदैः 'स्वच्छताविषये' संवादं पूरयत – 6

| |
|---|
| प्रधानाचार्यः, तव, प्रतिदिनम्, स्वच्छताकार्यक्रमः, विद्यालयात्, अस्मिन् विषये |

योगेशः – सरिते ! अद्य .............. (i) ........... विद्यालये कः कार्यक्रमः आसीत् ?

सरिता – अद्य मम विद्यालये .............. (ii) ........... आसीत् ।

योगेशः – .............. (iii) ........... तत्र स्वच्छता न भवति किम् ?

सरिता – भवति, किन्तु अद्य अभियानरूपेण .............. (iv) ........... बहिः सार्वजनिकस्थानेषु स्वच्छतां कृतवन्तः ।

योगेशः – अहो ! .............. (v) ........... कः प्रेरितवान् ।

सरिता – अस्माकं .............. (vi) ........... उद्बोधितवान् ।

**अथवा**

मञ्जूषायाः उचितपदैः 'क्रीडायाः विषये' संवादं पूरयत ।

| |
|---|
| क्रीडायै, मित्राणि, करोषि, अहं, आवश्यकता, किमपि |

माता – विमले ! त्वम् अत्र किं .............. (i) ...........?

बिमला – मातः ! अहम् अत्र .............. (ii) ........... न करोमि ।

माता – तर्हि गच्छ ! तव .............. (iii) ........... तत्र क्रीडाङ्गणे क्रीडन्ति, तैः सह क्रीड ।

विमला – मम .............. (iv) ........... रुचिः नास्ति ।

माता – उत्तमस्वास्थ्यस्य कृते अस्माकं जीवने क्रीडायाः महती .............. (v) ........... भवति । अतः गच्छ, क्रीड ।

विमला – अस्तु, .............. (vi) ........... तर्हि क्रीडनाय गच्छामि ।

28. अधोलिखितेषु वाक्येषु केषाञ्चन षड्वाक्यानां संस्कृतेन अनुवादं कुरुथ – 6 × 1 = 6

(i) सत्य की ही विजय होती है ।

(ii) वृक्ष से पत्ता गिरता है ।

(iii) रमेश संस्कृत की पुस्तक पढ़ता है ।

(iv) विद्या विनय से सुशोभित होती है ।

(v) श्याम गणेश को नमस्कार करता है ।

(vi) गोविन्द नाटक देखता है ।

(vii) राधा नाचती है ।

(viii) विद्या धन सभी धनों में प्रधान है ।

(ix) कृष्णा कलम से लिखती है ।

(x) यह पुस्तक सोहन की है ।

DO NOT WRITE ANYTHING HERE